# PrAtahsmaranam

# प्रातःस्मरणम्

## Document Information

Text title : Pratahsmarana Shlokas 2

File name : prAtaHsmaraNashlokAni.itx

Category : misc, suprabhAta

Location : doc_z_misc_misc

Transliterated by : Paresh Panditrao

Proofread by : Paresh Panditrao

Latest update : October 14, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 16, 2023

*sanskritdocuments.org*

# प्रातःस्मरणम्

अथ प्रातःस्मरणं -
ॐ श्री गं नमः ।
प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ॥ ऋग्वेद् ७.०४१.०१
प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ॥ १॥

प्रातःस्मरामि भवभीतिमहार्तिशान्त्यै
नारायणं गरुडवाहनमब्जनाभम् ।
ग्राहाभिभूत-वर-वारण-मुक्तिहेतुं
चक्रायुधं तरुण-वारिज-पत्रनेत्रम् ॥ २॥

प्रातः स्मरामि गणनाथमनाथबन्धुं
सिन्दूरपूर्ण-परिशोभित-गण्डयुग्मम् ।
उद्दण्ड-विघ्न-परिखण्डनचण्डदण्ड-
माखण्डलादि-सुरनायक-वृन्दवन्द्यम् ॥ ३॥

प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं
रूपं हि मण्डलमृचोऽथ तनुर्यजूंषि ।
सामानि यस्य किरणाः प्रभवादिहेतुं
ब्रह्मा हरात्मकमलक्ष्यमचिन्त्यरूपम् ॥ ४॥

प्रातः स्मरामि भवभीतिहरं सुरेशं
गङ्गाधरं वृषभवाहनमम्बिकेशम् ।
खट्वाङ्ग-शूल-वरदाभय-हस्तमीशं
संसाररोगहरमौषधमद्वितीयम् ॥ ५॥

प्रातः स्मरामि शरदिन्दुकरोज्ज्वलाभां

सद्रत्नवन्मकरकुण्डलहारशोभाम् ।
दिव्यायुधार्जितसुनीलसहस्त्रहस्तां
रक्तोत्पलाभचरणां भवतीं परेशाम् ॥ ६॥

त्रैलोक्य-चैतन्य-मयादिदेव !
श्रीनाथ ! विष्णो ! भवदाज्ञयैव ।
प्रातः समुत्त्थाय तव प्रियार्थं
संसारयात्रामनुवर्तयिष्ये ॥ ७॥

जानामि धर्मं न च मे प्रवृत्ति
र्जानाम्यधर्मं न च मे निवृत्तिः ।
त्वया हृषीकेश ! हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि ॥ ८॥

सुप्तः प्रबोधितो विष्णो हृषीकेशेन यत्त्वया ।
यद्यत्कारयसे कर्म तत्करोमि तवाज्ञया ॥ ९॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जन-शलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ १०॥

ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः
कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ११॥

वैन्यं पृथु हैहयमर्जुनञ्च
शाकुन्तलेयं भरतं नलञ्च ।
रामञ्च यो वै स्मरति प्रभाते
तस्यार्थलाभो विजयश्च हस्ते ॥ १२॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥ १३॥

मातृपितृसहस्त्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि यानि यास्यन्ति चापरे ॥ १४॥

हर्षस्थानसहस्त्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ १५॥

ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥ १६॥

न जातु कामान्न भयान्न लोभा
    द्धर्मं त्यजेज्जीवितस्यापि हेतोः ।
धर्मो नित्यः सुखदुःखे त्वनित्ये
    जीवो नित्यो हेतुरस्य त्वनित्यः ॥ १७॥

इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् ।
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ॥ १८॥

कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान् ।
योऽस्य सङ्कीर्तयेन्नाम कल्य उत्थाय मानवः ॥ १९॥

न तस्य वित्तनाशः स्यान्नष्टञ्च लभते पुनः ॥

इत्यादिपौराणमन्त्रान् पठित्वा
ॐ समुद्रवसने देवि पर्वतस्तनमण्डिते ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ ( म. पा. )
इति प्रार्थ्योत्त्थाय हस्तेन स्पृष्ट्वा श्वासानुसारेण
च भूमौ पादं दत्त्वा गवादिमङ्गलानि पश्येत् ।
श्रोत्रियं सुभगां गाञ्च अग्निमग्निचितं तथा ।
प्रातरुत्त्थाय यः पश्येदापद्भ्यः स प्रमुच्यते ॥ ( ना. दे. )॥

Encoded and proofread by Paresh Panditrao

*PrAtahsmaranam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*